दया समस्तभूतेषु तितिक्षा नाभिमानिता ।
सत्यं शौचमनायासो मङ्गलं प्रियवादिता ॥
मैत्र्यस्पृहा तथा तद्वदकार्पण्यं नरेश्वर ।
अनसूया च सामान्या वर्णानां कथिता गुणाः ॥
आश्रमाणाञ्च सर्व्वेषामेते सामान्यलक्षणाः ।
गुणास्तथापद्धर्म्माश्च विप्रादीनामिमान् शृणु ॥
क्षात्त्रं कर्म्म द्विजस्योक्तं वैश्यकर्म्म तथापदि ।
राजन्यस्य च वैश्योक्तं शौद्रं कर्म्म न चैतयोः ॥
सामर्थ्ये सति तत्त्याज्यमुभाभ्यामपि पार्थिव ।
तदेवापदि कर्त्तव्यं न कुर्य्यात् कर्म्म सङ्करम् ॥
इत्येते कथिता राजन् वर्णधर्म्मा मया तव ।
धर्म्मानाश्रमिणां सम्यग्ब्रुवतो मे निशामय ॥*॥

श्रीऔर्व्व उवाच ।

बालः कृतोपनयनो वेदाहरणतत्परः ।
गुरुगेहे वसेद्भूप ब्रह्मचारी समाहितः ॥
शौचाचारवता तत्र कार्य्यं शुश्रूषणं गुरोः ।
व्रतानि चरता ग्राह्यो वेदश्च कृतबुद्धिना ॥
उभे सन्ध्ये रविं भूप तथैवाग्निं समाहितः ।
उपतिष्ठेत्तथा कुर्य्याद्गुरोरप्यभिवादनम् ॥
स्थिते तिष्ठेद्व्रजेद्याति नीचैरासीत चासति ।
शिष्यो गुरौ नृपश्रेष्ठ प्रतिकूलं न सञ्चरेत् ॥
तेनैवोक्तः पठेद्वेदं नान्यचित्तः पुरःस्थितः ।
अनुज्ञातश्च भिक्षान्नमश्नीयाद्गुरुणा ततः ॥
अवगाहेदपः पूर्व्वमाचार्य्येणावगाहिताः ।
समिज्जलादिकं चास्य कल्यं कल्यमुपानयेत् ॥
गृहीतग्राह्यवेदश्च ततोऽनुज्ञामवाप्य वै ।
गार्हस्थ्यमाविशेत् प्राज्ञो निष्पन्नगुरुनिष्कृतिः ॥१॥
विधिनावाप्तदारस्तु धनं प्राप्य स्वकर्म्मणा ।
गृहस्थकार्य्यमखिलं कुर्य्याद्भूपाल ! शक्तितः ॥
निर्व्वापेण पितॄनर्च्चेद्यज्ञैर्देवांस्तथातिथीन् ।
अन्नैर्मुनींश्च स्वाध्यायैरपत्येन प्रजापतिम् ॥
बलिकर्म्मणा च भूतानि वात्सल्येनाखिलं जगत् ।
प्राप्नोति लोकान् पुरुषो निजकर्म्मसमर्ज्जितान् ॥
भिक्षाभुजश्च ये केचित् परिव्राट् ब्रह्मचारिणः ।
तेऽप्यत्रैव प्रतिष्ठन्ते गार्हस्थ्यं तेन वै परम् ॥
वेदाहरणकार्य्याय तीर्थस्नानाय च प्रभो ! ।
अटन्ति वसुधां विप्राः पृथिवीदर्शनाय च ॥
अनिकेता ह्यनाहारा यत्र सायंगृहाश्च ये ।
तेषां गृहस्थः सर्व्वेषां प्रतिष्ठा योनिरेव च ॥
तेषां स्वागतदानादि वक्तव्यं मधुरं वचः ।
गृहागतानां दद्याच्च शयनासनभोजनम् ॥
अतिथिर्यस्य भग्नाशो गृहात् प्रतिनिवर्त्तते ।
स दत्त्वा दुष्कृतं तस्मै पुण्यमादाय गच्छति ॥
अवज्ञानमहङ्कारो दम्भश्चैव गृहे सतः ।
परितापोपघातौ च पारुष्यञ्च न शस्यते ॥
यस्तु सम्यक् करोत्येवं गृहस्थः परमं विधिम् ।
सर्व्वबन्धविनिर्मुक्तो लोकानाप्नोत्यनुत्तमान् ॥
वयःपरिणतौ राजन् कृतकृत्यो गृहाश्रमी ।
पुत्त्रेषु भार्य्यां निक्षिप्य वनं गच्छेत् सहैव वा ॥२॥
पर्णमूलफलाहारः केशश्मश्रुजटाधरः ।
भूमिशायी भवेत्तत्र मुनिः सर्व्वातिथिर्नृप ॥
चर्म्मकाशकुशैः कुर्य्यात् परिधानोत्तरीयके ।
तद्वत्त्रिषवणं स्नानं शस्तमस्य नरेश्वर ॥
देवताभ्यर्च्चनं होमः सर्व्वाभ्यागतपूजनम् ।
भिक्षा बलिप्रदानञ्च शस्तमस्य नरेश्वर ॥
वन्यस्नेहेन गात्राणामभ्यङ्गश्चास्य शस्यते ।
तपश्चतस्य राजेन्द्र शीतोष्णादिसहिष्णुता ॥
यस्त्वेतां नियतश्चर्य्यां वानप्रस्थश्चरेन्मुनिः ।
स दहत्यग्निवद्दोषान् जयेल्लोकांश्च शाश्वतान् ॥३॥
चतुर्थश्चाश्रमो भिक्षोः प्रोच्यते यो मनीषिभिः ।
तस्य स्वरूपं गदतो मम श्रोतुं नृपार्हसि ॥
पुत्त्रद्रव्यकलत्रेषु त्यक्तस्नेहो नराधिप ।
चतुर्थमाश्रमस्थानं गच्छेन्निर्धूतमत्सरः ।
त्रैवर्गिकांस्त्यजेत् सर्व्वानारम्भानवनीपते ।
मित्रादिषु समो मैत्रः समस्तेष्वेव जन्तुषु ॥
जरायुजाण्डजादीनां वाङ्मनःकर्म्मभिः क्वचित् ।
युक्तः कुर्व्वीत न द्रोहं सर्व्वसङ्गांश्च वर्ज्जयेत् ॥
एकरात्रस्थितिर्ग्रामे पञ्चरात्रस्थितिः पुरे ।
तथा तिष्ठेद्यथा प्रीतिर्द्वेषो वा नास्य जायते ॥
प्राणयात्रानिमित्तञ्च व्यङ्गारे भुक्तवज्जने ।
काले प्रशस्तवर्णानां भिक्षार्थं पर्य्यटेद्गृहान् ॥
कामः क्रोधस्तथा दर्पमोहलोभादयश्च ये ।
तांस्तु दोषान् परित्यज्य परिव्राट् निर्म्ममो भवेत् ॥
अभयं सर्व्वसत्त्वेभ्यो दत्त्वा यश्चरते मुनिः ।
न तस्य सर्व्वभूतेभ्यो भयमुत्पद्यते क्वचित् ॥

कृत्वाग्निहोत्रं स्वशरीरसंस्थं
शारीरमग्निञ्च स्वमुखे जुहोति ।
विप्रस्तु भैक्षोपगतैर्हविर्भि-
श्चिताग्निनां स व्रजति स्म लोकान् ॥"

चिताग्नीनां अग्निचितामित्यर्थः । चिताग्निना इति वा पाठः । इति तट्टीका ॥

"मोक्षाश्रमं यश्चरते यथोक्तं
शुचिः सुसङ्कल्पितबुद्धियुक्तः ।
अनिन्धनं ज्योतिरिव प्रशान्तं
स ब्रह्मलोकं श्रयति द्विजातिः ॥" ४ ॥

इति विष्णुपुराणे ३ अंशे ८।९ अध्यायौ ॥*॥
प्रकारान्तरेण तेषामादिसृष्टिर्यथा,—
"ततस्तेजोमयं दिव्यं पद्मं सृष्टं स्वयम्भुवा ।
तस्मात् पद्मात् समभवद्ब्रह्मा वेदमयो विधिः ॥
प्रजाविसर्गं विविधं मानसो मनसासृजत् ।
असृजद्ब्राह्मणानेव पूर्व्वं ब्रह्मा प्रजापतिः ॥
आत्मतेजोभिर्निर्वृत्तान् भास्कराग्निसमप्रभान् ।
ततः सत्यञ्च धर्म्मञ्च तपो ब्रह्म च शाश्वतम् ॥
आचारञ्चैव शौचञ्च स्वर्गाय विदधे विभुः ।
देवदानवगन्धर्व्वा दैत्यासुरमहोरगाः ॥
यक्षराक्षसनागाश्च पिशाचा मनुजास्तथा ।
ब्राह्मणाः क्षत्त्रिया वैश्याः शूद्राश्च नृपसत्तम ! ॥
ये चान्ये भूतसंघानां वर्णास्तांश्च विनिर्म्ममे ।
ब्राह्मणानां सितो वर्णः क्षत्त्रियाणाञ्च लोहितः ॥
वैश्यस्य पीतको वर्णः शूद्राणामसितस्तथा ॥

मान्धातोवाच ।

चातुर्व्वर्ण्यस्य वर्णेन यदि वर्णो विभज्यते ।
सर्व्वेषां खलु वर्णानां दृश्यते वर्णसङ्करः ॥
कामः क्रोधो भयं लोभः शोकश्चिन्ता क्षुधा श्रमः ।
सर्व्वेषां न प्रभवति कस्माद्वर्णो विभज्यते ॥
स्वेदमूत्रपुरीषाणि श्लेष्मापित्तं सशोणितम् ।
तनुः क्षरति सर्व्वेषां कस्माद्वर्णो विभज्यते ॥
जङ्गमानामसंख्येयाः स्थावराणाञ्च जातयः ।
तेषां विविधवर्णानां कुतो वर्णविनिश्चयः ॥

नारद उवाच ।

न विशेषोऽस्ति वर्णानां सर्व्वं ब्रह्ममयं जगत् ।
ब्रह्मणा पूर्व्वसृष्टं हि कर्म्मभिर्व्वर्णतां गतम् ॥
कामभोगप्रियास्तीक्ष्णाः क्रोधनाः प्रियसाहसाः ।
त्यक्तस्वधर्म्मा रक्ताङ्गास्ते द्विजाः क्षत्रतां गताः ॥
गोभ्यो वृत्तिं समास्थाय पीताः कृष्युपजीविनः ।
स्वधर्म्मान्नानुतिष्ठन्ति ते द्विजा वैश्यतां गताः ॥
हिंसानृतप्रिया लुब्धाः सर्व्वकर्म्मोपजीविनः ।
कृष्णाः शौचपरिभ्रष्टास्ते द्विजाः शूद्रतां गताः ॥
इत्येतैः कर्म्मभिर्व्यस्ता द्विजा वर्णान्तरं गताः ।
इत्येते चतुरो वर्णा येषां ब्राह्मी सरस्वती ॥
विहिता ब्रह्मणा पूर्व्वं लोभात्त्वज्ञानतां गताः ।
ब्राह्मणा धर्म्मतन्त्रस्थास्तपस्तेषां न नश्यति ॥
ब्रह्म धारयतां नित्यं व्रतानि नियमांस्तथा ।
ब्रह्म चैव परं सृष्टं ये न जानन्ति तद्विदः ॥
ऋषिभिः स्वेन तपसा सृज्यन्ते चापरे परैः ।
आदिदेवसमुद्भूता ब्रह्ममूलाक्षताव्ययाः ।
सा सृष्टिर्मानसी नाम धर्म्मतन्त्रपरायणा ॥

मान्धातोवाच ।

ब्राह्मणः केन भवति क्षत्त्रियो वा द्विजोत्तम ! ।
वैश्यः शूद्रश्च देवर्षे तद्ब्रूहि वदतांवर ॥

नारद उवाच ।

जातकर्म्मादिभिर्यस्तु संस्कारैः संस्कृतः शुचिः ।
वेदाध्ययनसम्पन्नः षट्सु कर्म्मस्ववस्थितः ॥
शौचाचारपरो नित्यं विघसाशी गुरुप्रियः ।
नित्यव्रती सत्यरतः स वै ब्राह्मण उच्यते ॥
सत्यं दानमथोऽद्रोह आनृशंस्यं क्षमा घृणा ।
तपश्च दृश्यते यत्र स ब्राह्मण इति स्मृतः ॥
क्षत्त्रजं सेवते कर्म्म वेदाध्ययनसंयुतः ।
दानादानरतिर्यस्तु स वै क्षत्त्रिय उच्यते ॥
विशत्याशु पशुभ्यश्च कृष्यादानरतिः शुचिः ।
वेदाध्ययनसम्पन्नः स वैश्य इति संज्ञितः ॥
सर्व्वभक्ष्यरतिर्नित्यं सर्व्वकर्म्मकरोऽशुचिः ।
त्यक्तवेदस्त्वनाचारः स वै शूद्र इति स्मृतः ॥
शूद्रे चैव भवेल्लक्ष्यं द्विजे चैव न विद्यते ।
न वै शूद्रो भवेच्छूद्रो ब्राह्मणो न च ब्राह्मणः

मान्धातोवाच ।

के धर्म्माः सर्व्ववर्णानां चातुर्व्वर्ण्यस्य के पृथक् ।
चातुर्व्वर्ण्याश्रमाणाञ्च राजधर्म्माश्च के मताः ॥

नारद उवाच ।

अक्रोधः सत्यवचनं संविभागः क्षमा तथा ।